यथाहि "वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्र विध्युद्देशवर्त्तिनां वायव्यादीनां पदानां विधिना सम्बन्धः "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिङ्गमयतीति" इत्येषामर्थवादगतानाम् पदानाम्। नहि भवति वायुर्व्वा आलभेत क्षेपिष्ठा देवता वा अलभेतेत्यादि। वायुस्वभावसङ्कीर्त्तनेन त्ववान्तरमन्वयं प्रतिपद्य एवंविशिष्टदैवत्यमिदं कर्म्मेति विधिं स्तुवन्ति। तद्यत्र योऽवान्तरवाक्यार्थः प्रमाणान्तरगोचरोभवति तत्र तदनुवादेनार्थवादः प्रवर्त्तते। यत्र प्रमाणान्तरविरुद्धस्तत्र गुणवादेन। यत्र तु तदुभयं नास्ति तत्र किं प्रमाणान्तराभावाद्गुणवादः स्यात् आहोस्वित् प्रमाणान्तराविरोधाद्विद्यमानार्थवाद इति प्रतीतिशरणैर्विद्यमानार्थवादआश्रयणीयो न गुणवादः। एतेन मन्त्रो व्याख्यातः। अपि च विधिभिरेवेन्द्रादिदैवत्यानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपम्। न हि स्वरूपरहिता इन्द्रादयश्चेतसि आरोहयितुं शक्यन्ते। न च चेतस्यऽनारूढायै तस्यै तस्यै देवतायै हविः प्रदातुं शक्यते। श्रावयति च "यस्यै देवतायै हविर्गृहीतं स्यात् तान्ध्यायेत् वषट्करिष्यन्निति"। न च शब्दमात्रमर्थस्वरूपं सम्भवतीति शब्दार्थयोर्भेदात्, तत्र यादृशं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं न तत् तादृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तम्। इतिहासपुराणमपि व्याख्यातेन मार्गेण सम्भवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि प्रपञ्चयितुम्। प्रत्यक्षमूलमपि सम्भवति, भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम्। तथाच व्यासादयो देवताभिः प्रत्यक्षं व्यवहरन्तीति स्मर्य्यते। यस्तु ब्रूयादिदानीन्तनानामिव पूर्व्वेषामपि नास्ति देवादिभिर्व्यवहर्त्तुं सामार्थ्यमिति स जगद्वैचित्र्यम्प्रतिषेधेत् इदानीमिव च नान्यदापि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात् ततश्च राजसूयादिचोदना उपरुन्ध्यात् इदानीमिव च कालान्तरेऽपि अव्यवस्थितप्रायान् वर्णाश्रमधर्म्मान् प्रतिजानीत ततश्च व्यवस्थाविधायिशास्त्रमनर्थकं कुर्य्यात्। तस्मात् धर्म्मोत्कर्षवशाच्चिरन्तनाः देवताभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते। अपिच स्मरन्ति "स्वाध्यायादिष्टदेवतासम्प्रयोग" इत्यादि योगोऽप्यणिमाद्यैश्वर्य्यप्राप्तिफलकः स्मर्य्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम्। श्रुतिश्च योगमाहात्म्यं प्रत्याख्यापयति "पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति"। ऋषीणामपि मन्त्रब्राह्मणदर्शनात् सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम्। तस्मात् समूलमितिहासपुराणम्। लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाध्यवसातुं युक्ता। तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यन्ते इति" भा०।

विग्रहादिपदेन "विग्रहोहविषां भोगऐश्वर्य्यञ्च प्रसन्नता। फलप्रदानमित्येतत् पञ्चकं विग्रहादिकमिति" आन०गि० उक्तं पञ्चकमाहुः तच्च क्रमेण मीमांसाभाष्ये पूर्व्वपक्षे दर्शितम्। शब्दचिन्तामणावपि देवानां विग्रहवत्त्वं चेतनत्वञ्च व्यवस्थापितम् यथा "एवं देवतादावपि इन्द्रमुपासीतेत्यादौ लोके प्रयोगस्यानियमाद्गौणतयैव व्यवहाराच्चार्थाद्यनध्यवसायेन लौकिके सहस्राक्षादाविन्द्रादिपदशक्तिग्रहः प्रमाणञ्च इन्द्र सहस्राक्ष इत्यादिविधिसमभिव्याहृतोऽर्थवादएव स्वर्गपदवत्। अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्या 'तत्सुखं स्वःपदास्पदमिति' श्रुतेश्चार्थवादादेव शक्तिग्रहः नचेह तथार्थवादः किन्तु 'इन्द्रः सहस्राक्षः इत्यादिस्तावकत्वेन प्रवृत्तिपर इति चेत् न इन्द्रः सहस्राक्षः" इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतितो बाधकं विना सहस्राक्षस्यैवेन्द्रादिपदवाच्यत्वावधारणात् प्रसिद्धपदसमन्वयबलेन प्रतीयमानमर्थमबाधितमादायैव तेषां प्रवृत्तिपरत्वात् मन्त्रप्रकाशितशशिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां देवताव्यवहारात् अपि च शिवाय गां दद्यादित्यादौ देवतासंप्रदानत्वश्रुतेः, शिवादिसहस्रनाम्नां पर्य्यायत्वेन श्रुते र्महाजनपरिग्रहेण प्रमाणत्वात् आराधितदेवताया वरदातृत्वश्रुतेश्च बाधकं विना चेतनैव देवता। अथ देवताचैतन्ये तत्प्रीतिरेव यागव्यापार इति नापूर्वसिद्धिरिति चेत् न प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाशित्वात् तज्जन्यसंस्कारस्य स्वाविषये फलाहेतुत्वात् फलहेतुस्थायिकृतिव्यापारापेक्षायां लाघवेन कृतिसमानाश्रयस्यैव व्यापारत्वकल्पनात् नानायागेष्वेकदाह्वाने चैकदा सन्निधानं तद्बुद्धिविशेष एव प्रतिष्ठितविधिना प्रतिमादावहङ्कारवत्। अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिरचेतनएव। देवता चेतना नास्ति मानाभावात् किन्तु देशनादेशितचतुर्थ्यन्तपदनिर्द्दिश्यत्वं देवतात्वम् इन्द्रायेत्यादिपदमेव देवता। अतएवाग्निप्रकाशकमन्त्रेऽग्निप्रणयनस्यान्तरम् अग्नये इति नियमतो हविस्त्यागः न पर्य्यायान्तरेण। न चेन्द्रोद्देशेन हविस्त्यागः